

# शीक्षावल्ली śīkṣāvallī

**Sri Sathya Sai Baba Centers**

**Region 5 - USA**



# शीक्षावल्ली śīkṣāvallī

शं नो॑ मि॒त्र-श्शं वरू॑णः।

śaṁ no mi̱tra-śśaṁ varūṇaḥ |

शं नो॑ भवत्वर्य॒मा।

śaṁ no bhavatvarya̱mā |

शं न॒ इन्द्रो॒ बृह॒स्पति॑ः।

śaṁ na̱ indro̱ bṛha̱spatiḥ |



# शीक्षावल्ली śīkṣāvallī

शं नो विष्णु-रुरुक्रमः।

śaṁ no viṣṇu-rurukramaḥ |

नमो ब्रह्मणे। नमस्ते वायो।

namo brahmaṇe | namaste vāyo |

त्वमेव प्रत्यक्षं ब्रह्मासि।

tvameva pratyakṣaṁ brahmāsi |

त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि।

tvameva pratyakṣaṁ brahma vadiṣyāmi |



# शीक्षावल्ली śīkṣāvallī

ऋतं वदिष्यामि। सत्यं वदिष्यामि।

ṛtaṁ va'diṣyāmi | satyaṁ va'diṣyāmi |

तन्मामवतु। तद्वक्तारमवतु।

tanmāma'vatu | tadvaktāra'mavatu |

अवतु माम्। अवतु वक्तारम्।

ava'tu mām | ava'tu vaktārām" |



# शीक्षावल्ली śīkṣāvallī

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥ १ ॥

om śānti̱ḥ śānti̱ḥ śānti̍ḥ ||1 ||



# शीक्षावल्ली śīkṣāvallī

शीक्षां व्याख्यास्यामः।

śīkṣāṁ vyākhyāsyāmaḥ।

वर्ण-स्स्वरः।

varṇa-ssvaraḥ ।

मात्रा बलम्। साम सन्तानः।

mātrā balam । sāma santānaḥ ।

इत्युक्त-श्शीक्षाध्यायः॥ २॥

ityukta-śśīkṣādhyāyaḥ ।। 2 ।।



# शीक्षावल्ली śīkṣāvallī

सह नौ यशः ।

saha nau yaśaḥ |

सह नौ ब्रह्मवर्चसम् ॥ ३ ॥

saha nau brahmavarcasam || 3 ||



# शीक्षावल्ली śīkṣāvallī

अथातस्सगंहिताया उपनिषदं व्याख्यास्यामः।

athātassagaṁhitāyā upaniṣadaṁ

vyākhyāsyāmaḥ |

पञ्चस्वधिकरणेषु॥ ४॥

pañcasvadhikaraṇeṣu || 4 ||



# शीक्षावल्ली śīkṣāvallī

अधिलोकमधिज्यौतिष-मधिविद्य-मधिप्रजं-मध्यात्मम्।

adhilokamadhijyautiṣa-madhividya-

madhipraja-madyātmam ।

ता महासगंहिता इत्याचक्षते।

tā mahāsagaṁhitā ityācakṣate ।



# शीक्षावल्ली śīkṣāvallī

अथा॑धिलो॒कम्। पृथिवि पू॒र्व॑रू॒पम्।

athā̍dhilo̱kam | pṛthivi pū̎rvarū̱pam |

द्यौ रू॒त्त॑ररू॒पम्। आका॑श-स्स॒न्धिः।

dyau rūkta̍rarū̱pam | ākā̍śa-ssa̱ndhiḥ |

वायु॑-स्सन्धा॒नम्। इत्य॑धिलो॒कम्॥५॥

vāyu̍-ssandhā̱nam | itya̍dhilo̱kam ||5||



# शीक्षावल्ली śīkṣāvallī

अथाधिज्यौतिषम्। अग्निः पूर्वरूपम्।

athādhijyautiṣam । agniḥ pūrvarūpam ।

आदित्य उत्तररूपम्। आपस्सन्धिः।

āditya uttararūpam । āpassandhiḥ ।

वैद्युतस्सन्धानम्। इत्यधिज्यौतिषम्॥ ६ ॥

vaidyutassandhānam । ityadhijyautiṣam ॥6॥



# शीक्षावल्ली śīkṣāvallī

अथाधिविद्यम्। आचार्यः पूर्वरूपम्।

athādhividyam । ācāryaḥ pūrvarūpam ।

अन्तेवास्युत्तररूपम्। विद्या सन्धिः।

antevāsyutrarūpam । vidyā sandhiḥ ।

प्रवचनगं् सन्धानम्। इत्यधिविद्यम्॥ ७॥

pravacanagṁ sandhānam ।

ityadhividyam ।। 7 ।।



# शीक्षावल्ली śīkṣāvallī

अथाधिप्रजम् माता पूर्वरूपम्।

athādhiprajam mātā pūrvarūpam ।

पितोत्तररूपम्। प्रजासन्धिः।

pitottararūpam । prajāsandhiḥ ।

प्रजननगं सन्धानम्। इत्यधिप्रजम्॥ ८॥

prajananagṁ sandhānam । ityadhiprajam ।। 8 ।।



# शीक्षावल्ली śīkṣāvallī

अथाध्या॒त्मम्। अधराहनुः पू᳚र्वरू॒पम्।

athādhyā̱tmam | adharāhanuḥ pū̎rvarū̱pam |

उत्तराहनु - रूत्त॑ररू॒पम्। वाक्स॒न्धिः।

uttarāhanu - rūtta̍rarū̱pam | vāksa̱ndhiḥ |

जिह्वा॑सन्धा॒नम्। इत्यध्या॒त्मम्॥ १॥

jihvā̍sandhā̱nam | ityadhyā̱tmam || 9 ||



# शीक्षावल्ली śīkṣāvallī

इतीमाम्हा॒सग्ं। हिताः।

itīmāmhāsa̱gṁ । hitāḥ ।

य एवमेता महासग्ं हिता व्याख्याता वे॒द।

ya evametā mahāsagṁhitā vyākhyātā ve̱da ।

सन्धीयते प्रजया प॒शुभिः।

sandhīyate prajayā pa̱śubhiḥ ।



# शीक्षावल्ली śīkṣāvallī

ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण॑ लोके॒न॥ १०॥

brahmavarcasenānnādyena suvargyeṇa lokena | | 10 | |



# शीक्षावल्ली śīkṣāvallī

यश्छन्दसा-मृषभो विश्वरूपः ।

yaśchandasā-mṛṣabho viśvarūpaḥ |

छन्दोभ्योऽध्यमृतात्संबभूव ।

chandobhyo'dhyamṛtāthsambabhūva |

समेन्द्रो मेधया स्पृणोतु ।

samendro medhayā spṛṇotu |

अमृतस्य देवधारणो भूयासम् ।

amṛtasya devadhāraṇo bhūyāsam |



# शीक्षावल्ली śīkṣāvallī

शरीरं मे विचर्षणम्।

śarīraṁ me vicarṣaṇam |

जिह्वा मे मधुमत्तमा।

jihvā me madhumattamā |

कर्णाभ्यां भूरिविश्रुवम्।

karṇābhyāṁ bhūriviśruvam |



# शीक्षावल्ली śīkṣāvallī

ब्रह्मणः कोशोसि मेधया पिहितः ।

brahmaṇaḥ kośosi medhayā pihitaḥ ।

श्रुतं मे गोपाय॥ ११ ॥

śrutaṁ me gopāya ।।11।।



# शीक्षावल्ली śīkṣāvallī

आवहन्तीवितन्वाना।

āvahantīvitanvānā |

कुर्वाणा चीर - मात्मनः ।

kurvāṇā cīra - mātmanaḥ |

वासाग्ं सि मम गावश्च।

vāsāgṁ si mama gāvaśca |

अन्नपाने च सर्वदा।

annapāne ca sarvadā |



# शीक्षावल्ली śīkṣāvallī

ततो मे श्रिय - मावह।

tato me śriya - māvaha |

लोमशां पशुभिस्सह स्वाहा ।

lomaśāṁ paśubhissaha svāhā |

आमायन्तु ब्रह्मचारिणस्स्वाहा ।

āmāyantu brahmacāriṇassvāhā |



# शीक्षावल्ली śīkṣāvallī

विमाऽऽयन्तु ब्रह्मचारिणस्स्वाहा ।

vimā''yantu brahmacā̱riṇa̱ssvāhā |

प्रमाऽऽयन्तु ब्रह्मचारिणस्स्वाहा ।

pramā''yantu brahmacā̱riṇa̱ssvāhā |

दमायन्तु ब्रह्मचारिणस्स्वाहा ।

damāyantu brahmacā̱riṇa̱ssvāhā |

शमायन्तु ब्रह्मचारिणस्स्वाहा । ॥ १२॥

śamāyantu brahmacā̱riṇa̱ssvāhā | || 12 ||



# शीक्षावल्ली śīkṣāvallī

यशो॒ जने॑ऽसानि॒ स्वाहा᳚ ।

yaśo̱ jane̍'sāni̱ svāhā̎ |

श्रेया॒न्॒ वस्य॑सोऽसानि॒ स्वाहा᳚ ।

śreyā̱ṉ vasya̍so'sāni̱ svāhā̎ |

तं त्वा॑ भग॒ प्रवि॑शानि॒ स्वाहा᳚ ।

taṁ tvā̍ bhaga̱ pravi̍śāni̱ svāhā̎ |

स मा॑ भग॒ प्रवि॑श॒ स्वाहा᳚ ।

sa mā̍ bhaga̱ pravi̍śa̱ svāhā̎ |



# शीक्षावल्ली śīkṣāvallī

तस्मिन् सहस्रशाखे ॥

tasmin sahasraśākhe | |

निभगाऽहं त्वयि मृजे स्वाहा ।

nibhagā'haṁ tvayi mṛje svāhā |

यथाऽऽपः प्रवताऽऽयन्ति ।

yathā''paḥ pravatā''yanti |

यथा मासा अहर्जरम् ।

yathā māsā aharjaram |



# शीक्षावल्ली śīkṣāvallī

एवं मां ब्रंह्मचारिणं ः ।

evaṁ māṁ brahmacāriṇaḥ ।

धात - रायंन्तु सर्वत - स्वाहा ।

dhāta - rāyantu sarvata - svāhā ।

प्रतिवेशोंऽऽसि प्रमांभाहि प्रमांपध्यस्व ॥ १३ ॥

prativeśo''si pramābhāhi pramāpadhyasva ।। 13 ।।



# शीक्षावल्ली śīkṣāvallī

भू - र्भुव-स्सुव-रिति वा एता-स्तिस्रो व्याहृतयः।

bhū-rbhuva-ssuva-riti vā etā-stisro vyāhratayaḥ |

तासामुहस्मै तां चतुर्थीम्।

tāsāmuhasmai tāṁ caturthīm |

माहाचमस्यः प्रवेदयते।

māhācamasyaḥ pravedayate |

मह इति। तद् ब्रह्म। स आत्मा।

maha iti | tad brahma | sa ātmā |



# शीक्षावल्ली śīkṣāvallī

अङ्गान्यन्या देवताः।

aṅgānyanyā devatāḥ |

भूरिति वा अयं लोकः।

bhūriti vā ayaṁ lokaḥ |

भुव इत्यन्तरिक्षम्।

bhuva ityantarikṣam |

सुव - रित्यसौ लोकः॥ १४॥

suva - rityasau lokaḥ | | 14 | |



# शीक्षावल्ली śīkṣāvallī

मह इत्यादित्यः।

maha ityādityaḥ ।

आदित्येन वाव सर्वे - लोका महीयन्ते।

ādityena vāva sarve - lokā mahīyante ।

भूरिति वा अग्निः।

bhūriti vā agniḥ ।

भुव इति वायुः।

bhuva iti vāyuḥ ।



# शीक्षावल्ली śīkṣāvallī

सुव॒ - रित्या॑दि॒त्यः।

suva̱ - rityā̍di̱tyaḥ ।

मह॒ इति॑ च॒न्द्रमा᳚ः।

maha̱ iti̍ ca̱ndramā̎ḥ ।

च॒न्द्रम॑सा वाव सर्वा॑णि॒ ज्योतीगं॑षि॒ मही॑यन्ते।

ca̱ndrama̍sā vāva sarvā̍ṇi̱ jyotīgṁ̍ṣi̱ mahī̍yante ।

भू॒ - रिति॒ वा ऋच॑ः।

bhū̱ - riti̱ vā ṛca̍ḥ ।



# शीक्षावल्ली śīkṣāvallī

भुव इति सामानि।

bhuva iti sāmāni |

सुव - रिति यजूगंषि॥

suva - riti yajūgṁṣi ||

मह इति ब्रह्म।

maha iti brahma |

ब्रह्मणा वाव सर्वे - वेदा महीयन्ते।

brahmaṇā vāva sarve - vedā mahīyante |



# शीक्षावल्ली śīkṣāvallī

भूरिति वै प्राणः।

bhūriti vai prāṇaḥ |

भुव इत्यपानः।

bhuva ityapānaḥ |

सुव - रिति व्यानः।

suva - riti vyānaḥ |

मह इत्यन्नम्।

maha ityannam |



# शीक्षावल्ली śīkṣāvallī

अन्नेन वाव सर्वे प्राणा महीयन्ते।

annena vāva sarve prāṇā mahīyante ।

ता वा एताश्चतस्रश्चतुर्धा।

tā vā etāścatasraścaturdhā ।

चतस्रश्चतस्रो व्याहृतयः।

catasraścatasro vyāhratayaḥ ।

ता यो वेद।

tā yo veda ।



# शीक्षावल्ली śīkṣāvallī

स वेद ब्रह्म।

sa ve'da brahma' |

सर्वेऽस्मैदेवा बलिमावहन्ति॥ १५॥

sarve''smaidevā balimāva'hanti || 15 ||